अस्माभिस्तव रूप - लक्षण - गुणान् वक्तुं कथं शक्यते,
मातर्मां परि-पाहि विश्व-जनके! कृत्वा ममेष्टं ध्रुवम्॥१६

दीनार्ति - भीतं भव-ताप-पीडितं, धनैर्विहीनं तव पार्श्वमागतम्।
कृपा-निधित्वान्मम लक्ष्मि!सत्वरं, धन-प्रदानाद्धन-नायकं कुरु॥१७

मां विलोक्य स-दये हरि-प्रिये! निर्धनं तव समीपमागतम्।
देहि मे झटिति लक्ष्मि! कराग्रं, वस्त्र-काञ्चन-वरान्नमद्भुतम्॥१८॥

त्वमेव जननी लक्ष्मि! पिता लक्ष्मि! त्वमेव च। भ्राता त्वं च सखा लक्ष्मि!, विद्या लक्ष्मि! त्वमेव च॥१९
त्राहि त्राहि महा-लक्ष्मि!, त्राहि त्राहि सुरेश्वरि! त्राहि त्राहि जगन्मातर्दारिद्र्यात् त्राहि वेगतः॥२०
नमस्तुभ्यं जगद्धात्रि!, नमस्तुभ्यं नमो नमः। धर्माधारे! नमस्तुभ्यं, नमः सम्पत्ति-दायिनि!॥२१
दारिद्र्यार्णव - मग्नोऽहं, निमग्नोऽहं रसातले। मज्जन्तं मां करे धृत्वा, तूद्धर त्वं रमे! द्रुतम्॥२२
किं लक्ष्मि! बहुनोक्तेन, जल्पितेन पुनः पुनः। अन्यन्मे शरणं नास्ति, सत्यं सत्यं हरि-प्रिये!॥२३

॥फल-श्रुति॥

एतच्छ्रुत्वाऽगस्ति-वाक्यं, हृष्यमाणा हरि-प्रिया। उवाच मधुरां वाणीं, तुष्टाऽहं तव सर्वदा॥१॥

॥श्रीलक्ष्मी उवाच॥

यत्-त्वयोक्तमिदं स्तोत्रं, यः पठिष्यति मानवः। शृणोति च महा-भागस्तस्याहं वश-वर्तिनी॥२॥
नित्यं पठति यो मत्त्मा, त्वलक्ष्मीस्तस्य नश्यति। ऋणं च नश्यते तीव्रं, वियोगं नैव पश्यति॥३॥
यः पठेत् प्रातरुत्थाय, श्रद्धा-भक्ति-समन्वितः। गृहे तस्य सदा तुष्टा, नित्यं श्री- पतिना सह॥४॥
सुख-सौभाग्य-सम्पन्नो, मनस्वी बुद्धि-मान् भवेत्। पुत्र-वान् गुण-वान् श्रेष्ठो, भोग-भोगा च मानवः॥५॥
इदं स्तोत्रं महा-पुण्यं, लक्ष्म्याः प्रीति-करं वरम्। विष्णु-प्रसाद-जननं, चतुर्वर्ग-फल-प्रदम्॥६॥
राज-द्वारे जयश्चैव, शत्रोश्चैव पराजयः। भूत-प्रेत-पिशाचानां, व्याघ्राणां न भयं तथा॥७॥
न शस्त्रानल-तोयौघाद् भयं तस्य प्रजायते। दुर्वृत्तानां च पापानां, बहु-हानि-करं परम्॥८॥
मन्दुराकरि-शालासु, गवां गोष्ठे समाहितः। पठेत् तद्-दोष-शान्त्यर्थे, महा-पातक-नाशनम्॥९॥
सर्व-सौख्य-करं नृणामायुरारोग्यदं तथा। अगस्ति-मुनिना प्रोक्तं, प्रजानां हित-काम्यया॥१०॥

॥श्रीअगस्त्य-विरचितं श्रीमहा-लक्ष्मी-स्तोत्रं सम्पूर्णम्॥



श्रीमहा-लक्ष्म्यै नमः

श्रीमहा-लक्ष्मी-सहस्र-नाम-जप-प्रयोग

सङ्कल्प— ॐ तत्सत्। अद्यैतस्य ब्रह्मणोऽह्नि द्वितीय-परार्द्धे, श्वेत-वाराह-कल्पे, जम्बू-द्वीपे, भरत-खण्डे, आर्यावर्त-देशे, पुण्य-क्षेत्रे, कलि-युगे, कलि-प्रथम-चरणे, अमुक (...) संवत्सरे, अमुक-मासे, अमुक-पक्षे, अमुक-तिथौ, अमुक-वासरे, अमुक-गोत्रः, अमुक-शर्मा (वर्मा, गुप्तो, दासो), अहं श्रीमहा-लक्ष्मी-प्रीत्यर्थं सहस्र-नाम-मन्त्रैः यथा-शक्ति यजनं करिष्ये।

विनियोग— ॐ अस्य श्रीमहा-लक्ष्मी-सहस्र-नाम-मन्त्रस्य श्रीमहा-विष्णुः भगवान् ऋषिः, अनुष्टुप् छन्दः, श्रीमहा-लक्ष्मीः देवता, **'श्रीं'**-बीजम्, **'ह्रीं'**-शक्तिः, **'ह्रैं'**-कीलकम्, श्रीमहा-लक्ष्मी-प्रसाद-सिद्ध्यर्थे जपे विनियोगः।

ऋष्यादि-न्यास— श्रीमहा-विष्णु-भगवद्-ऋषये नमः शिरसि, अनुष्टुप्-छन्दसे नमः मुखे, श्रीमहा-लक्ष्मी-देवतायै नमः हृदये, 'श्रीं'-बीजाय नमः गुह्ये, 'ह्रीं'-शक्तये नमः पादयोः, 'ह्रैं'-कीलकाय नमः नाभौ, श्रीमहा-लक्ष्मी-प्रसाद-सिद्ध्यर्थे जपे विनियोगाय नमः अञ्जलौ।

कर-न्यास— श्रां अङ्गुष्ठाभ्यां नमः, श्रीं तर्जनीभ्यां स्वाहा, श्रूं मध्यमाभ्यां वषट्, श्रैं अनामिकाभ्यां हुं, श्रौं कनिष्ठिकाभ्यां वौषट्, श्रः करतल-कर-पृष्ठाभ्यां फट्।

अङ्ग-न्यास— श्रां हृदयाय नमः, श्रीं शिरसे स्वाहा, श्रूं शिखायै वषट्, श्रैं कवचाय हुं, श्रौं नेत्र-त्रयाय वौषट्, श्रः अस्त्राय फट्।

ध्यान—

पद्मानने पद्म-करे, सर्व-लोकैक-पूजिते! सान्निध्यं कुरु मे चित्ते, विष्णु-वक्षः-स्थल-स्थिते! ॥१॥
भगवद्दक्षिणे पार्श्वे, श्रीदेवीं सहसोत्थिताम्। ईश्वरीं सर्व-भूतानां, जननीं सर्व-देहिनाम् ॥२॥
चारु-स्मितां चारु-दन्तीं, चारु-नेत्रानन-भ्रुवम्। सु-कपोलां सु-कर्णाग्र-न्यस्त-मौक्तिक-कुण्डलाम्॥३॥
सु-केशां चारु-बिम्बोष्ठीं, रक्त-तुङ्ग-घन-स्तनीम्। अलकाग्रैरलि-निभैरलंकृत-मुखाम्बुजाम् ॥४॥
लसत्कनक-सङ्काश-पीन-सुन्दर-कन्धराम्। निष्क-कण्ठीं स्तनालम्बिमुक्ता-हार-विराजिताम् ॥५॥
नील-कुन्तल-मध्यस्थां, माणिक्य-मुकुटोज्ज्वलाम्। शुक्ल-माल्याम्बर-धरां, तप्त-हाटक-वर्णिनीम्॥६॥
अनन्य-सुलभैस्तैस्तैर्गुणैः साम्य-युतां निजैः। अनुरूपांनवद्याङ्गीं, हरेर्नित्यानपायिनीम् ॥७॥

मानस-पूजन— ॐ लं पृथ्वी-तत्त्वात्मकं गन्धं श्रीमहा-लक्ष्मी-प्रीतये समर्पयामि नमः। ॐ हं आकाश-तत्त्वात्मकं पुष्पं श्रीमहा-लक्ष्मी-प्रीतये समर्पयामि नमः। ॐ यं वायु-तत्त्वात्मकं धूपं श्रीमहा-लक्ष्मी-प्रीतये घ्रापयामि नमः। ॐ रं अग्नि-तत्त्वात्मकं दीपं श्रीमहा-लक्ष्मी-प्रीतये दर्शयामि नमः। ॐ वं जल-तत्त्वात्मकं नैवेद्यं श्रीमहा-लक्ष्मी-प्रीतये निवेदयामि नमः। ॐ शं सर्व-तत्त्वात्मकं ताम्बूलं श्रीमहा-लक्ष्मी-प्रीतये समर्पयामि नमः।

श्रीमहा-लक्ष्मी-सहस्र-नामावलि

ॐ श्रियै नमः
ॐ वासुदेव-महिष्यै नमः
ॐ पुं-प्रधानेश्वरेश्वर्यै नमः
ॐ अचिन्त्यानन्त-विभवायै नमः
ॐ भावाभाव-विभाविन्यै नमः
ॐ अहं-भावात्मिकायै नमः
ॐ पद्मायै नमः
ॐ शान्तानन्त-जितात्मिकायै नमः
ॐ ब्रह्म-भावं गतायै नमः
ॐ त्यक्त-भीतायै नमः ॥ १० ॥
ॐ सर्व-जगन्मय्यै नमः
ॐ षाड्-गुण्य-पूर्णायै नमः
ॐ त्रय्यन्त-रूपायै नमः
ॐ आत्मानप-गामिन्यै नमः
ॐ एक-योग्यायै नमः
ॐ अशून्य-भावाकृत्यै नमः
ॐ तेजः-प्रभाविन्यै नमः
ॐ भाव्याभावक-भावायै नमः
ॐ आत्म-भाव्यायै नमः
ॐ काम-दुघे नमः ॥ २० ॥
ॐ आत्म-भुवे नमः
ॐ भाव्याभाव-मय्यै नमः
ॐ दिव्यायै नमः
ॐ भेद्य-भेदक-भावगायै नमः
ॐ जगत्-कुटुम्बिन्यै नमः
ॐ अखिलाधारायै नमः
ॐ काम-विजृम्भिण्यै नमः
ॐ पञ्च-कृत्य-कर्यै नमः
ॐ पञ्च-शक्ति-मय्यै नमः
ॐ आत्म-वल्लभायै नमः ॥ ३० ॥
ॐ भावाभावानुगायै नमः
ॐ सर्व-सम्मतायै नमः
ॐ आत्मोप-गूहिन्यै नमः
ॐ अपृथक्-चारिण्यै नमः
ॐ सौम्यायै नमः
ॐ सौम्य-रूपायै नमः
ॐ अव्यवस्थितायै नमः
ॐ आद्यन्त-रहितायै नमः
ॐ देव्यै नमः
ॐ भव-भाव्य-स्वरूपिण्यै नमः
ॐ महा-विभूत्यै नमः
ॐ समतां गतायै नमः
ॐ ज्योतिर्गणेश्वर्यै नमः
ॐ सर्व-कार्य-कर्यै नमः
ॐ धर्म-स्वभावायै नमः
ॐ आत्माग्रतःस्थितायै नमः
ॐ आज्ञा-सम-विभक्ताङ्ग्यै नमः
ॐ ज्ञानानन्द-क्रिया-मय्यै नमः
ॐ स्वातन्त्र्य-रूपायै नमः
ॐ देवोरः-स्थितायै नमः ॥ ५० ॥
ॐ तद्धर्म-धर्मिण्यै नमः
ॐ सर्व-भूतेश्वर्यै नमः
ॐ सर्व-भूत-मात्रे नमः
ॐ आत्म-मोहिन्यै नमः
ॐ सर्वाङ्ग-सुन्दर्यै नमः
ॐ सर्व-व्यापिन्यै नमः
ॐ प्राप्त-योगिन्यै नमः
ॐ विमुक्ति-दायिन्यै नमः
ॐ भक्त-गम्यायै नमः
ॐ संसार-तारिण्यै नमः ॥ ६० ॥
ॐ धर्मार्थ-वादिन्यै नमः
ॐ व्योम-निलयायै नमः
ॐ व्योम-विग्रहायै नमः
ॐ पञ्च-व्योम-पद्यै नमः
ॐ रक्षो-व्यावृत्यै नमः
ॐ प्राप्य-पूरिण्यै नमः
ॐ आनन्द-रूपायै नमः
ॐ सर्वाप्ति-शालिन्यै नमः
ॐ शक्ति-नायिकायै नमः
ॐ हिरण्य-वर्णायै नमः ॥ ७० ॥
ॐ हैरण्य-प्राकारायै नमः
ॐ हेम-मालिन्यै नमः
ॐ प्रस्फुरत्तायै नमः
ॐ भद्र-होमायै नमः
ॐ वेशिन्यै नमः
ॐ रजत-स्रजायै नमः
ॐ स्वाज्ञा-कार्य-भरायै नमः
ॐ नित्य-सुरभ्यै नमः
ॐ व्योम-चारिण्यै नमः
ॐ योग-क्षेम-वहायै नमः ॥ ८० ॥
ॐ सर्व-सुलभायै नमः
ॐ इच्छा-क्रियात्मिकायै नमः
ॐ महा-समूहायै नमः
ॐ निखिल-प्ररोहायै नमः

ॐ वेद-गोचरायै नमः
ॐ विस्मयाधायिन्यै नमः
ॐ ब्रह्म-संहितायै नमः
ॐ सु-गुणोत्तरायै नमः
ॐ प्रज्ञा-परिमितायै नमः
ॐ आत्मानुरूपायै नमः ॥ ९० ॥
ॐ सत्योपायार्जितायै नमः
ॐ मनो-ज्ञेयायै नमः
ॐ ज्ञान-गम्यायै नमः
ॐ नित्य-मुक्तायै नमः
ॐ आत्म-सेविन्यै नमः
ॐ कर्तृ-शक्त्यै नमः
ॐ सु-गहनायै नमः
ॐ भोक्तृ-शक्त्यै नमः
ॐ गुण-प्रियायै नमः
ॐ ज्ञान-शक्त्यै नमः ॥ १०० ॥
ॐ अनौपम्यायै नमः
ॐ पर-शक्त्यै नमः
ॐ निरामयायै नमः
ॐ अकलङ्कायै नमः
ॐ महा-शक्त्यै नमः
ॐ निराधारायै नमः
ॐ विकासिन्यै नमः
ॐ महा-मायायै नमः
ॐ महा-नन्दायै नमः
ॐ ब्रह्म-नीत्यै नमः ॥ ११० ॥
ॐ निराश्रयायै नमः
ॐ एक-स्वरूपायै नमः
ॐ त्रिविधायै नमः
ॐ संख्यातीतायै नमः
ॐ निरञ्जनायै नमः
ॐ आत्म-सक्तायै नमः
ॐ नित्य-शुचये नमः
ॐ निर्विकल्पायै नमः
ॐ सुखोचितायै नमः
ॐ नित्य-शान्तायै नमः ॥ १२० ॥
ॐ निस्तरङ्गायै नमः
ॐ निर्भिन्नायै नमः
ॐ सर्व-भेदिन्यै नमः
ॐ असङ्कीर्णायै नमः
ॐ अविधेयात्मने नमः
ॐ निषेद्धयायै नमः
ॐ सर्व-पावन्यै नमः
ॐ निष्कामनायै नमः
ॐ सर्व-रसायै नमः
ॐ अभेद्यायै नमः ॥ १३० ॥
ॐ सर्वार्थ-साधिन्यै नमः
ॐ अनिर्देश्यायै नमः
ॐ अपरिमितायै नमः
ॐ निर्विकारायै नमः
ॐ त्रि-लक्षणायै नमः
ॐ अभयङ्कर्यै नमः
ॐ स्त्री-स्वरूपायै नमः
ॐ अव्यक्तायै नमः
ॐ सदसदाकृत्यै नमः
ॐ अप्रतर्क्यायै नमः ॥ १४० ॥
ॐ अप्रतिहतायै नमः
ॐ नियन्त्र्यै नमः
ॐ यन्त्र-वाहिन्यै नमः
ॐ हार्द-मूर्त्यै नमः
ॐ महा-मूर्त्यै नमः
ॐ अव्यक्तायै नमः
ॐ विश्व-गोपिन्यै नमः
ॐ वर्धमानायै नमः
ॐ अनवद्याङ्ग्यै नमः
ॐ निरवद्यायै नमः ॥ १५० ॥
ॐ त्रि-वर्गदायै नमः
ॐ अप्रमेयायै नमः
ॐ अमृत-दुघायै नमः
ॐ कूटस्थायै नमः
ॐ कुल-नन्दिन्यै नमः
ॐ अविगीतायै नमः
ॐ तन्त्र-सिद्धायै नमः
ॐ योग-सिद्धायै नमः
ॐ अमरेश्वर्यै नमः
ॐ विश्व-सूत्यै नमः ॥ १६० ॥
ॐ तर्पयन्त्यै नमः
ॐ नित्य-तृप्तायै नमः
ॐ महौषध्यै नमः
ॐ शब्दात्ययायै नमः
ॐ शब्द-सहायै नमः
ॐ कृतज्ञायै नमः
ॐ कृत-लक्षणायै नमः
ॐ त्रिवर्तिन्यै नमः
ॐ त्रिलोकस्थायै नमः
ॐ भूर्भुवःस्वरयोनिजायै नमः
ॐ अग्राह्यायै नमः
ॐ अग्राहकायै नमः
ॐ अनन्ताह्वयायै नमः
ॐ सर्वाति-शायिन्यै नमः
ॐ व्योम-पद्मायै नमः
ॐ कृत-धुरायै नमः
ॐ पूर्ण-कामायै नमः
ॐ महेश्वर्यै नमः
ॐ सु-वाच्यायै नमः
ॐ वाचिकायै नमः ॥ १८० ॥

ॐ सत्य-कथनायै नमः
ॐ सर्व-पावन्यै नमः
ॐ लक्ष्यमाणायै नमः
ॐ लक्षयन्त्यै नमः
ॐ जगज्ज्येष्ठायै नमः
ॐ शुभावहायै नमः
ॐ जगत्-प्रतिष्ठायै नमः
ॐ भुवन-भर्त्र्यै नमः
ॐ गूढ-प्रभाविन्यै नमः
ॐ क्रिया-योगात्मिकायै नमः ॥
ॐ मूर्तायै नमः
ॐ हृदब्जस्थायै नमः
ॐ महा-क्रमायै नमः
ॐ परम-दिवे नमः
ॐ प्रथमजायै नमः
ॐ परमाप्तायै नमः
ॐ जगन्निधये नमः
ॐ आत्मानपायिन्यै नमः
ॐ तुल्य-स्वरूपायै नमः
ॐ सम-लक्षणायै नमः ॥ २०० ॥
ॐ तुल्य-वृत्तायै नमः
ॐ सम-वयसे नमः
ॐ मोद-मानायै नमः
ॐ खग-ध्वजायै नमः
ॐ तुल्य-चेष्टायै नमः
ॐ तुल्य-शीलायै नमः
ॐ वरदायै नमः
ॐ काम-रूपिण्यै नमः
ॐ समग्र-लक्षणायै नमः
ॐ अनन्तायै नमः ॥ २१० ॥
ॐ तुल्य-भूत्यै नमः
ॐ सनातनायै नमः

ॐ महर्द्धये नमः
ॐ सत्य-सङ्कल्पायै नमः
ॐ भूमिजायै नमः
ॐ परमेश्वर्यै नमः
ॐ जगन्मात्रे नमः
ॐ सूत्र-वत्यै नमः
ॐ भूत-धात्र्यै नमः
ॐ यशस्विन्यै नमः ॥ २२० ॥
ॐ महाऽभिलाषायै नमः
ॐ सावित्र्यै नमः
ॐ प्रधानायै नमः
ॐ सर्व-भासिन्यै नमः
ॐ नाना-वपुषे नमः
ॐ बहु-विधायै नमः
ॐ सर्वज्ञायै नमः
ॐ पुण्य-कीर्तनायै नमः
ॐ भूताश्रयायै नमः
ॐ हृषीकेशायै नमः ॥ २३० ॥
ॐ अशोकायै नमः
ॐ स्वाङ्गि-वाहिकायै नमः
ॐ ब्रह्मात्मिकायै नमः
ॐ पुण्य-जन्यै नमः
ॐ सत्य-कामायै नमः
ॐ समाधि-भुवे नमः
ॐ हिरण्य-गर्भायै नमः
ॐ गम्भीरायै नमः
ॐ गो-धूल्यै नमः
ॐ कमलासनायै नमः ॥ २४० ॥
ॐ जित-क्रोधायै नमः
ॐ कुमुदिन्यै नमः
ॐ वैजयन्त्यै नमः
ॐ मनोजवायै नमः

ॐ धन-लक्ष्म्यै नमः
ॐ स्वस्ति-कर्यै नमः
ॐ राज्य-लक्ष्म्यै नमः
ॐ महा-सत्यै नमः
ॐ जय-लक्ष्म्यै नमः
ॐ महा-गोष्ठ्यै नमः ॥ २५० ॥
ॐ मघोन्यै नमः
ॐ माधव-प्रियायै नमः
ॐ पद्म-गर्भायै नमः
ॐ वेद-वत्यै नमः
ॐ विविक्तायै नमः
ॐ परमेष्ठिन्यै नमः
ॐ सुवर्ण-बिन्दवे नमः
ॐ महत्यै नमः
ॐ महा-योगि-प्रियायै नमः
ॐ अनघायै नमः ॥ २६० ॥
ॐ पद्मेस्थितायै नमः
ॐ वेद-मय्यै नमः
ॐ कुमुदायै नमः
ॐ जय-वाहिन्यै नमः
ॐ संहृत्यै नमः
ॐ निर्मितायै नमः
ॐ ज्योतिषे नमः
ॐ नियत्यै नमः
ॐ विविधोत्सवायै नमः
ॐ रुद्र-वन्द्यायै नमः ॥ २७० ॥
ॐ सिन्धु-मत्यै नमः
ॐ वेद-मात्रे नमः
ॐ मधु-व्रतायै नमः
ॐ विश्वम्भरायै नमः
ॐ हैमवत्यै नमः
ॐ समुद्रायै नमः

ॐ इच्छा-विहारिण्यै नमः
ॐ अनुकूलायै नमः
ॐ यज्ञ-वत्यै नमः
ॐ शत-कोटच्यै नमः ॥ २८० ॥
ॐ सु-पेशलायै नमः
ॐ धर्मोदयायै नमः
ॐ धर्म-सेवायै नमः
ॐ सु-कुमार्यै नमः
ॐ सभा-वत्यै नमः
ॐ भीमायै नमः
ॐ ब्रह्म-स्तुतायै नमः
ॐ मध्य-प्रभायै नमः
ॐ देवर्षि-वन्दितायै नमः
ॐ देव-भोग्यायै नमः ॥ २९० ॥
ॐ महा-भागायै नमः
ॐ प्रतिज्ञायै नमः
ॐ पूर्ण-शेवध्यै नमः
ॐ सु-वर्णायै नमः
ॐ रुचिर-प्रख्यायै नमः
ॐ भोगिन्यै नमः
ॐ भोग-दायिन्यै नमः
ॐ वसु-प्रणायै नमः
ॐ उत्तम-वध्वै नमः
ॐ गायत्र्यै नमः ॥ ३०० ॥
ॐ कमलोद्भवायै नमः
ॐ विद्वत्-प्रियायै नमः
ॐ पद्म-चिह्नायै नमः
ॐ वरिष्ठायै नमः
ॐ कमलेक्षणायै नमः
ॐ पद्म-प्रियायै नमः
ॐ सु-प्रसन्नायै नमः
ॐ प्रमोदायै नमः

ॐ प्रिय-पार्श्वगायै नमः
ॐ विश्व-भूषायै नमः ॥ ३१० ॥
ॐ कान्ति-मत्यै नमः
ॐ कृष्णायै नमः
ॐ वीणा-रवोत्सुकायै नमः
ॐ रोचिष्कर्यै नमः
ॐ स्व-प्रकाशायै नमः
ॐ शोभमानायै नमः
ॐ विहङ्गमायै नमः
ॐ देवाङ्गस्थायै नमः
ॐ परिणत्यै नमः
ॐ काम-वत्सायै नमः ॥ ३२० ॥
ॐ महा-मत्यै नमः
ॐ इल्वलायै नमः
ॐ उत्पल-नाभायै नमः
ॐ आधि-शमन्यै नमः
ॐ वर-वर्णिन्यै नमः
ॐ स्व-निष्ठायै नमः
ॐ पद्म-निलयायै नमः
ॐ सद्-गत्यै नमः
ॐ पद्म-गन्धिन्यै नमः
ॐ पद्म-वर्णायै नमः ॥ ३३० ॥
ॐ काम-योन्यै नमः
ॐ चण्डिकायै नमः
ॐ चारु-कोपनायै नमः
ॐ रति-स्नुषायै नमः
ॐ पद्म-धरायै नमः
ॐ पूज्यायै नमः
ॐ त्रैलोक्य-मोहिन्यै नमः
ॐ नित्य-कन्यायै नमः
ॐ बिन्दु-मालिन्यै नमः
ॐ अक्षयायै नमः ॥ ३४० ॥

ॐ सर्व-गन्धिन्यै नमः
ॐ गन्धात्मिकायै नमः
ॐ सु-रसिकायै नमः
ॐ दीप्त-मूर्त्यै नमः
ॐ सु-मध्यमायै नमः
ॐ पृथु-श्रोण्यै नमः
ॐ सौम्य-मुख्यै नमः
ॐ सुभगायै नमः
ॐ विष्टर-श्रुत्यै नमः
ॐ स्मिताननायै नमः ॥ ३५० ॥
ॐ चारु-गत्यै नमः
ॐ निम्न-नाभ्यै नमः
ॐ महा-स्तन्यै नमः
ॐ स्निग्ध-वेण्यै नमः
ॐ भगवत्यै नमः
ॐ सु-कान्तायै नमः
ॐ वाम-लोचनायै नमः
ॐ पल्लवाङ्घ्र्यै नमः
ॐ पद्म-मनसे नमः
ॐ पद्म-बोधायै नमः ॥ ३६० ॥
ॐ महाऽप्सरसे नमः
ॐ सरस्वत्यै नमः
ॐ चारु-हासायै नमः
ॐ शुभ-दृष्ट्यै नमः
ॐ ककुद्मिन्यै नमः
ॐ कम्बु-ग्रीवायै नमः
ॐ सु-जघनायै नमः
ॐ रक्त-पाण्यै नमः
ॐ मनोरमायै नमः
ॐ पद्मिन्यै नमः ॥ ३७० ॥
ॐ मन्द-गमनायै नमः
ॐ चतुर्दंष्ट्रायै नमः

ॐ चतुर्भुजायै नमः
ॐ शुभ-रेखायै नमः
ॐ विलास-भ्रुवे नमः
ॐ शुक-वाण्यै नमः
ॐ कला-वत्यै नमः
ॐ ऋतु-नासायै नमः
ॐ कल-रवायै नमः
ॐ वरारोहायै नमः ॥ ३८० ॥
ॐ तलोदर्यै नमः
ॐ सन्ध्यायै नमः
ॐ बिम्बाधरायै नमः
ॐ पूर्व-भाषिण्यै नमः
ॐ श्रीसमाह्वयायै नमः
ॐ इक्षु-चापायै नमः
ॐ सुम-शरायै नमः
ॐ दिव्य-भूषायै नमः
ॐ मनोहरायै नमः
ॐ वासव्यै नमः ॥ ३९० ॥
ॐ पाण्डरच्छत्रायै नमः
ॐ करभोरवे नमः
ॐ तिलोत्तमायै नमः
ॐ सीमन्तिन्यै नमः
ॐ प्राण-शक्त्यै नमः
ॐ विभीषिण्यै नमः
ॐ असु-धारिण्यै नमः
ॐ भद्रायै नमः
ॐ जयावहायै नमः
ॐ चन्द्र-वदनायै नमः ॥ ४०० ॥
ॐ कुटिलालकायै नमः
ॐ चित्राम्बरायै नमः
ॐ चित्र-गन्धायै नमः
ॐ रत्न-मौलि-समुज्ज्वलायै नमः
ॐ दिव्यायुधायै नमः
ॐ दिव्य-माल्यायै नमः
ॐ विशाखायै नमः
ॐ चित्र-वाहनायै नमः
ॐ अम्बिकायै नमः
ॐ सिन्धु-तनयायै नमः ॥ ४१० ॥
ॐ निःश्रेण्यै नमः
ॐ सु-महासिन्यै नमः
ॐ साम-प्रियायै नमः
ॐ नव-मृग्यै नमः
ॐ सर्व-सेव्यायै नमः
ॐ वराङ्गनायै नमः
ॐ गन्ध-द्वारायै नमः
ॐ दुराधर्षायै नमः
ॐ नित्य-पुष्टायै नमः
ॐ करीषिण्यै नमः ॥ ४२० ॥
ॐ देव-जुष्टायै नमः
ॐ दिव्य-वर्णायै नमः
ॐ दिव्य-गन्धायै नमः
ॐ स्व-कर्दमायै नमः
ॐ अनन्त-रूपायै नमः
ॐ अनन्तस्थायै नमः
ॐ सर्वदाऽनन्त-सङ्गमायै नमः
ॐ यज्ञाशन्यै नमः
ॐ महा-वृष्ट्यै नमः
ॐ सर्व-पूज्यायै नमः ॥ ४३० ॥
ॐ वषट्-क्रियायै नमः
ॐ योग-प्रियायै नमः
ॐ वियन्नाभ्यै नमः
ॐ अनन्त-श्रियै नमः
ॐ अतीन्द्रियायै नमः
ॐ योगि-सेव्यायै नमः
ॐ सत्य-रतायै नमः
ॐ योग-मायायै नमः
ॐ पुरातन्यै नमः
ॐ सर्वेश्वर्यै नमः ॥ ४४० ॥
ॐ सु-तरुण्यै नमः
ॐ शरण्यायै नमः
ॐ धर्म-देवतायै नमः
ॐ सुतरायै नमः
ॐ संवृत-ज्योतिषे नमः
ॐ योगिन्यै नमः
ॐ योग-सिद्धिदायै नमः
ॐ सृष्टि-शक्त्यै नमः
ॐ द्योतमान-भूतायै नमः
ॐ मङ्गल-देवतायै नमः ॥ ४५० ॥
ॐ संहार-शक्त्यै नमः
ॐ प्रबलायै नमः
ॐ निरुपाधये नमः
ॐ परा-वरायै नमः
ॐ उत्तारिण्यै नमः
ॐ तारयन्त्यै नमः
ॐ शाश्वत्यै नमः
ॐ समितिं-जयायै नमः
ॐ महा-श्रियै नमः
ॐ अजहत्-कीर्त्यै नमः ॥ ४६० ॥
ॐ योग-श्रियै नमः
ॐ सिद्धि-साधन्यै नमः
ॐ पुण्य-श्रियै नमः
ॐ पुण्य-निलयायै नमः
ॐ ब्रह्म-श्रियै नमः
ॐ ब्राह्मण-प्रियायै नमः
ॐ राज-श्रियै नमः
ॐ राज-कलितायै नमः

ॐ फल-श्रियै नमः
ॐ स्वर्ग-दायिन्यै नमः ॥ ४७० ॥
ॐ देव-श्रियै नमः
ॐ अद्भुत-कथायै नमः
ॐ वेद-श्रियै नमः
ॐ श्रुति-मार्गिण्यै नमः
ॐ तमोपहायै नमः
ॐ अव्यय-निधये नमः
ॐ लक्ष्मणायै नमः
ॐ हृदयङ्गमायै नमः
ॐ मृत-सञ्जीविन्यै नमः
ॐ शुभ्रायै नमः ॥ ४८० ॥
ॐ चन्द्रिकायै नमः
ॐ सर्वतोमुख्यै नमः
ॐ सर्वोत्तमायै नमः
ॐ मित्र-विन्दायै नमः
ॐ मैथिल्यै नमः
ॐ प्रिय-दर्शनायै नमः
ॐ सत्यभामायै नमः
ॐ वेद-वेद्यायै नमः
ॐ सीतायै नमः
ॐ प्रणत-पोषिण्यै नमः ॥ ४९० ॥
ॐ मूल-प्रकृत्यै नमः
ॐ ईशानायै नमः
ॐ शिवदायै नमः
ॐ दीप्त-दीपिन्यै नमः
ॐ अभिप्रियायै नमः
ॐ स्वैर-वृत्त्यै नमः
ॐ रुक्मिण्यै नमः
ॐ सर्व-साक्षिण्यै नमः
ॐ गान्धारिण्यै नमः
ॐ पर-गत्यै नमः ॥ ५०० ॥

ॐ तत्त्व-गर्भायै नमः
ॐ भवाभवायै नमः
ॐ अन्तर्वर्त्यै नमः
ॐ महा-मुद्रायै नमः
ॐ विष्णु-दुर्गायै नमः
ॐ महा-बलायै नमः
ॐ मदयन्त्यै नमः
ॐ लोक-धारिण्यै नमः
ॐ अदृश्यायै नमः
ॐ सर्व-निष्कृत्यै नमः ॥ ५१० ॥
ॐ देव-सेनायै नमः
ॐ आत्म-फलदायै नमः
ॐ वसुधायै नमः
ॐ मुख्य-मातृकायै नमः
ॐ क्षीर-धारायै नमः
ॐ घृत-मय्यै नमः
ॐ जुह्वत्यै नमः
ॐ यज्ञ-दक्षिणायै नमः
ॐ योग-निद्रायै नमः
ॐ योग-रतायै नमः ॥ ५२० ॥
ॐ ब्रह्मचर्यायै नमः
ॐ दुरत्ययायै नमः
ॐ सिद्ध-पिच्छायै नमः
ॐ महा-दुर्गायै नमः
ॐ जयन्त्यै नमः
ॐ खग-वाहिन्यै नमः
ॐ जगत्-प्रियायै नमः
ॐ विरूपाक्ष्यै नमः
ॐ सु-वर्णायै नमः
ॐ क्रूर-तापिन्यै नमः ॥ ५३० ॥
ॐ कात्यायन्यै नमः
ॐ काल-रात्र्यै नमः

ॐ निशि-दृष्टायै नमः
ॐ करालिकायै नमः
ॐ त्रि-शूलिन्यै नमः
ॐ खड्ग-धरायै नमः
ॐ महा-काल्यै नमः
ॐ इन्द्र-मालिन्यै नमः
ॐ एक-वीरायै नमः
ॐ भद्र-काल्यै नमः ॥ ५४० ॥
ॐ सौनन्द्यै नमः
ॐ उल्लसद्-गदायै नमः
ॐ नारायण्यै नमः
ॐ जगत्-पूरिण्यै नमः
ॐ उर्वरायै नमः
ॐ द्रुहिण-प्रस्वै नमः
ॐ यज्ञ-कामायै नमः
ॐ लेलिहानायै नमः
ॐ तीर्थ-कर्यै नमः
ॐ उग्र-विक्रमायै नमः ॥ ५५० ॥
ॐ गरुत्मदुदयायै नमः
ॐ अत्युग्रायै नमः
ॐ वाराह्यै नमः
ॐ मातृ-भाषिण्यै नमः
ॐ अश्व-क्रान्तायै नमः
ॐ रथ-क्रान्तायै नमः
ॐ विष्णु-क्रान्तायै नमः
ॐ उरु-चारिण्यै नमः
ॐ वैरोचिन्यै नमः
ॐ नारसिंह्यै नमः ॥ ५६० ॥
ॐ जीमूतायै नमः
ॐ शुभदेक्षणायै नमः
ॐ दीक्षा-विधायै नमः
ॐ विश्व-शक्त्यै नमः

ॐ निज-शक्त्यै नमः
ॐ सुदर्शिन्यै नमः
ॐ प्रतीत्यै नमः
ॐ जगत्यै नमः
ॐ वन्य-धारिण्यै नमः
ॐ कलि-नाशिन्यै नमः ॥ ५७० ॥
ॐ अयोध्यायै नमः
ॐ अच्छिन्न-सन्तानायै नमः
ॐ महा-रत्नायै नमः
ॐ सुखावहायै नमः
ॐ राज-वर्त्यै नमः
ॐ अर्क-प्रतिभायै नमः
ॐ विनयित्र्यै नमः
ॐ महाऽशनायै नमः
ॐ अमृत-स्यन्दिन्यै नमः
ॐ सीमायै नमः ॥ ५८० ॥
ॐ यज्ञ-गर्भायै नमः
ॐ समीक्षणायै नमः
ॐ आकूत्यै नमः
ॐ ऋग्-यजुः-साम-घोषायै नमः
ॐ आराम-वधूत्सुकायै नमः
ॐ सोमपायै नमः
ॐ माधव्यै नमः
ॐ नित्य-कल्याण्यै नमः
ॐ कमलार्चितायै नमः
ॐ योग-रूढ्यै नमः ॥ ५९० ॥
ॐ स्वार्थ-जुष्टायै नमः
ॐ वह्नि-वर्णायै नमः
ॐ जितासुरायै नमः
ॐ यज्ञ-विद्यायै नमः
ॐ गुह्य-विद्यायै नमः
ॐ अध्यात्म-विद्यायै नमः
ॐ कृतागमायै नमः
ॐ आप्यायिन्यै नमः
ॐ कलातीतायै नमः
ॐ सु-मित्रायै नमः ॥ ६०० ॥
ॐ पर-भक्तिदायै नमः
ॐ काङ्क्षमाणायै नमः
ॐ महा-मायायै नमः
ॐ कोल-कामायै नमः
ॐ अमरावत्यै नमः
ॐ सु-वीर्यायै नमः
ॐ दुःस्वप्न-हरायै नमः
ॐ देवक्यै नमः
ॐ वसु-देवतायै नमः
ॐ सौदामिन्यै नमः ॥ ६१० ॥
ॐ मेघ-रथायै नमः
ॐ ऋद्धिदायै नमः
ॐ दैत्य-मर्दिन्यै नमः
ॐ श्रेयस्कर्यै नमः
ॐ चित्र-लीलायै नमः
ॐ एकायन्यै नमः
ॐ रत्न-पादुकायै नमः
ॐ मनस्यमानायै नमः
ॐ तुलस्यै नमः
ॐ रोग-नाशिन्यै नमः ॥ ६२० ॥
ॐ उरु-प्रथायै नमः
ॐ तेजस्विन्यै नमः
ॐ सुखोज्ज्वालायै नमः
ॐ मन्द-रेखायै नमः
ॐ अमृताशिन्यै नमः
ॐ ब्रह्मिष्ठायै नमः
ॐ वह्नि-शमन्यै नमः
ॐ जुषमाणायै नमः
ॐ गुणात्ययायै नमः
ॐ कादम्बर्यै नमः ॥ ६३० ॥
ॐ ब्रह्म-रतायै नमः
ॐ विधात्र्यै नमः
ॐ उज्ज्वल-हस्तिकायै नमः
ॐ अक्षोभ्यायै नमः
ॐ सर्वतो-भद्रायै नमः
ॐ वयस्यायै नमः
ॐ स्वस्ति-दक्षिणायै नमः
ॐ सहस्रास्यायै नमः
ॐ ज्ञान-मात्रे नमः
ॐ वैश्वानर्यै नमः ॥ ६४० ॥
ॐ अक्ष-वर्तिन्यै नमः
ॐ प्रत्यग्-वरायै नमः
ॐ वारण-वत्यै नमः
ॐ अनसूयायै नमः
ॐ दुरासदायै नमः
ॐ अरुन्धत्यै नमः
ॐ कुण्डलिन्यै नमः
ॐ भव्यायै नमः
ॐ दुर्गति-नाशिन्यै नमः
ॐ मृत्युञ्जयायै नमः ॥ ६५० ॥
ॐ त्रास-हरायै नमः
ॐ निर्भयायै नमः
ॐ शत्रु-सूदिन्यै नमः
ॐ एकाक्षरायै नमः
ॐ सु-पुरन्ध्र्यै नमः
ॐ सुर-पक्षायै नमः
ॐ वरातुलायै नमः
ॐ सकृद्-विभासायै नमः
ॐ प्रद्युम्नायै नमः
ॐ हरि-भद्रायै नमः ॥ ६६० ॥

ॐ धुरन्धरायै नमः
ॐ बिल्व-प्रियायै नमः
ॐ अवन्यै नमः
ॐ चक्र-हृदयायै नमः
ॐ कम्बु-तीर्थगायै नमः
ॐ सर्व-मन्त्रात्मिकायै नमः
ॐ विद्युते नमः
ॐ यशोदायै नमः
ॐ सर्व-रञ्जिन्यै नमः
ॐ ध्वजच्छत्राश्रयायै नमः ॥ ६७० ॥
ॐ भूम्यै नमः
ॐ वैष्णव्यै नमः
ॐ सद्-गुणोज्ज्वलायै नमः
ॐ सुषेणायै नमः
ॐ लोक-विदितायै नमः
ॐ काम-सुवे नमः
ॐ जगदादि-भुवे नमः
ॐ वेदान्त-योन्यै नमः
ॐ जिज्ञासायै नमः
ॐ मनीषायै नमः ॥ ६८० ॥
ॐ सम-दर्शिन्यै नमः
ॐ सहस्र-शक्त्यै नमः
ॐ आवृत्त्यै नमः
ॐ सु-स्थिरायै नमः
ॐ श्रेयसां निधये नमः
ॐ रोहिण्यै नमः
ॐ रेवत्यै नमः
ॐ चन्द्र-सोदर्यै नमः
ॐ भद्र-मोदिन्यै नमः
ॐ आर्यायै नमः ॥ ६९० ॥
ॐ गव्य-प्रियायै नमः
ॐ विश्व-भाविन्यै नमः

ॐ सु-विभाविन्यै नमः
ॐ सु-प्रदृश्यायै नमः
ॐ काम-चारिण्यै नमः
ॐ अप्रमत्तायै नमः
ॐ ललन्तिकायै नमः
ॐ मोक्ष-लक्ष्म्यै नमः
ॐ जगद्योन्यै नमः
ॐ व्योम-लक्ष्म्यै नमः ॥ ७०० ॥
ॐ सु-दुर्लभायै नमः
ॐ भास्कर्यै नमः
ॐ पुण्य-गेहस्थायै नमः
ॐ मनोज्ञायै नमः
ॐ विभव-प्रदायै नमः
ॐ लोक-स्वामिन्यै नमः
ॐ अच्युतार्थायै नमः
ॐ पुष्कलायै नमः
ॐ जगदाकृत्यै नमः
ॐ विचित्र-हारिण्यै नमः ॥ ७१० ॥
ॐ कान्तायै नमः
ॐ पावन्यै नमः
ॐ भूत-भाविन्यै नमः
ॐ प्राणिन्यै नमः
ॐ प्राणदायै नमः
ॐ विदुष्यै नमः
ॐ विश्व-ब्रह्माण्ड-वासिन्यै नमः
ॐ सम्पूर्णायै नमः
ॐ परमोत्साहायै नमः
ॐ श्रीमत्यै नमः ॥ ७२० ॥
ॐ श्री-पत्यै नमः
ॐ श्रुत्यै नमः
ॐ श्रयन्त्यै नमः
ॐ श्रयमाणायै नमः

ॐ क्ष्मायै नमः
ॐ विश्व-रूपायै नमः
ॐ प्रसादिन्यै नमः
ॐ हर्षिण्यै नमः
ॐ प्रथमायै नमः
ॐ सर्वायै नमः ॥ ७३० ॥
ॐ विशालायै नमः
ॐ काम-वर्षिण्यै नमः
ॐ सु-प्रतीकायै नमः
ॐ पृश्नि-मत्यै नमः
ॐ निवृत्त्यै नमः
ॐ विविधायै नमः
ॐ परायै नमः
ॐ सु-यज्ञायै नमः
ॐ मधुरायै नमः
ॐ श्रीदायै नमः ॥ ७४० ॥
ॐ देव-रात्यै नमः
ॐ महा-मनसे नमः
ॐ स्थूलायै नमः
ॐ सर्वाकृत्यै नमः
ॐ सूक्ष्मायै नमः
ॐ निम्न-गव्यायै नमः
ॐ तमोनुदायै नमः
ॐ तुष्ट्यै नमः
ॐ वागीश्वर्यै नमः
ॐ पुष्ट्यै नमः ॥ ७५० ॥
ॐ सर्वायै नमः
ॐ आद्यायै नमः
ॐ स्वरु-शोषिण्यै नमः
ॐ शक्त्यात्मिकायै नमः
ॐ शब्द-शक्त्यै नमः
ॐ विशिष्टायै नमः

ॐ वायु-मत्यै नमः
ॐ अमायै नमः
ॐ आन्वीक्षिक्यै नमः
ॐ त्रयी-वार्तायै नमः ॥ ७६० ॥
ॐ दण्ड-नीत्यै नमः
ॐ नियामिकायै नमः
ॐ व्याल्यै नमः
ॐ सङ्कर्षण्यै नमः
ॐ द्योतायै नमः
ॐ महा-देव्यै नमः
ॐ अपराजितायै नमः
ॐ कपिलायै नमः
ॐ पिङ्गलायै नमः
ॐ स्वस्थायै नमः ॥ ७७० ॥
ॐ बलाक्यै नमः
ॐ घोष-नन्दिन्यै नमः
ॐ अजितायै नमः
ॐ कर्षण्यै नमः
ॐ क्षान्त्यै नमः
ॐ गरुडायै नमः
ॐ गरुडासनायै नमः
ॐ ह्लादिन्यै नमः
ॐ अनुग्रहायै नमः
ॐ नित्यायै नमः ॥ ७८० ॥
ॐ ब्रह्म-विद्यायै नमः
ॐ हिरण्मय्यै नमः
ॐ मह्यै नमः
ॐ शुद्ध-विधायै नमः
ॐ पृथ्व्यै नमः
ॐ शतानन्दायै नमः
ॐ अंशु-मालिन्यै नमः
ॐ यज्ञाश्रयायै नमः
ॐ ख्याति-परायै नमः
ॐ स्तव्यायै नमः ॥ ७९० ॥
ॐ घृष्ट्यै नमः
ॐ त्रि-कालगायै नमः
ॐ सम्बोधिन्यै नमः
ॐ शब्द-पूर्णायै नमः
ॐ विजयायै नमः
ॐ अंशु-मत्यै नमः
ॐ कलायै नमः
ॐ शिवायै नमः
ॐ स्तुति-प्रियायै नमः
ॐ ख्यात्यै नमः ॥ ८०० ॥
ॐ जीवयन्त्यै नमः
ॐ पुनर्वसवे नमः
ॐ दीक्षायै नमः
ॐ भक्तार्तिहायै नमः
ॐ रक्षायै नमः
ॐ परीक्षायै नमः
ॐ यज्ञ-सम्भवायै नमः
ॐ आर्द्रायै नमः
ॐ पुष्करिण्यै नमः
ॐ पुण्यायै नमः ॥ ८१० ॥
ॐ गण्यायै नमः
ॐ दारिद्र्य-भञ्जिन्यै नमः
ॐ धन्यायै नमः
ॐ मान्यायै नमः
ॐ पद्म-नेम्यै नमः
ॐ भार्गव्यै नमः
ॐ वंश-वर्धिन्यै नमः
ॐ तीक्ष्ण-प्रवृत्त्यै नमः
ॐ सत्-कीर्त्यै नमः
ॐ निधि-सेव्यायै नमः ॥ ८२० ॥
ॐ अघ-नाशिन्यै नमः
ॐ संज्ञायै नमः
ॐ निःसंशयायै नमः
ॐ पूर्वायै नमः
ॐ वन-मालायै नमः
ॐ वसुन्धरायै नमः
ॐ पृथ्व्यै नमः
ॐ महोत्कटायै नमः
ॐ अहल्यायै नमः
ॐ मण्डलायै नमः ॥ ८३० ॥
ॐ आश्रित-मानदायै नमः
ॐ सर्वस्यै नमः
ॐ नित्योदितायै नमः
ॐ उदारायै नमः
ॐ जृम्भमाणायै नमः
ॐ महोदयायै नमः
ॐ चन्द्र-कान्तोदितायै नमः
ॐ सूर्यायै नमः
ॐ चतुरश्रायै नमः
ॐ मनोजवायै नमः ॥ ८४० ॥
ॐ बालायै नमः
ॐ कुमार्यै नमः
ॐ युवत्यै नमः
ॐ करुणायै नमः
ॐ भक्त-वत्सलायै नमः
ॐ मेदिन्यै नमः
ॐ उपनिषन्मिश्रायै नमः
ॐ सुम-वीरवे नमः
ॐ धनेश्वर्यै नमः
ॐ दुर्मर्षण्यै नमः ॥ ८५० ॥
ॐ सु-चरितायै नमः
ॐ बोधायै नमः

ॐ शोभायै नमः
ॐ सु-वर्चलायै नमः
ॐ यमुनायै नमः
ॐ अक्षौहिण्यै नमः
ॐ गङ्गायै नमः
ॐ मन्दाकिन्यै नमः
ॐ अमलाशयायै नमः
ॐ गोदायै नमः ॥ ८६० ॥
ॐ गोदावर्यै नमः
ॐ चन्द्र-भागायै नमः
ॐ कावेर्यै नमः
ॐ उदन्वत्यै नमः
ॐ सिनी-वाल्यै नमः
ॐ कुह्वै नमः
ॐ राकायै नमः
ॐ वारणायै नमः
ॐ सिन्धु-मत्यै नमः
ॐ अमायै नमः ॥ ८७० ॥
ॐ पूर्तये नमः
ॐ मायात्मिकायै नमः
ॐ स्फूर्तये नमः
ॐ व्याख्यायै नमः
ॐ सूत्रायै नमः
ॐ प्रजा-वत्यै नमः
ॐ वृद्धयै नमः
ॐ स्थित्यै नमः
ॐ ध्रुवायै नमः
ॐ बुद्धयै नमः ॥ ८८० ॥
ॐ त्रिगुणायै नमः
ॐ गुण-गह्वरायै नमः
ॐ अमोघायै नमः
ॐ शान्तिदायै नमः
ॐ सत्यायै नमः

ॐ ज्ञानदायै नमः
ॐ उत्कर्षिण्यै नमः
ॐ शिवायै नमः
ॐ प्रकृत्यै नमः
ॐ भामिन्यै नमः ॥ ८९० ॥
ॐ लोलायै नमः
ॐ कमलायै नमः
ॐ काम-दुघे नमः
ॐ विध्यै नमः
ॐ प्रज्ञायै नमः
ॐ रामायै नमः
ॐ परायै नमः
ॐ सन्ध्यायै नमः
ॐ सुभद्रायै नमः
ॐ सर्व-मङ्गलायै नमः ॥ ९०० ॥
ॐ नन्दायै नमः
ॐ भद्रायै नमः
ॐ जयायै नमः
ॐ रिक्तायै नमः
ॐ तिथि-पूर्णायै नमः
ॐ ऋतम्भरायै नमः
ॐ काष्ठायै नमः
ॐ कामेश्वर्यै नमः
ॐ निष्ठायै नमः
ॐ काम्यायै नमः ॥ ९१० ॥
ॐ रम्यायै नमः
ॐ धरायै नमः
ॐ स्मृत्यै नमः
ॐ शङ्खिन्यै नमः
ॐ चक्रिण्यै नमः
ॐ श्यामायै नमः
ॐ सामायै नमः
ॐ गोत्रायै नमः

ॐ रमायै नमः
ॐ द्युत्यै नमः ॥ ९२० ॥
ॐ शान्तिदायै नमः
ॐ स्तुत्यै नमः
ॐ सिद्धयै नमः
ॐ विराजायै नमः
ॐ अत्युज्ज्वलायै नमः
ॐ अव्ययायै नमः
ॐ वाण्यै नमः
ॐ गौर्यै नमः
ॐ इन्दिरायै नमः
ॐ लक्ष्म्यै नमः ॥ ९३० ॥
ॐ मेधायै नमः
ॐ श्रद्धायै नमः
ॐ अप्रमायै नमः
ॐ द्युतये नमः
ॐ स्वधायै नमः
ॐ स्वाहायै नमः
ॐ रति-रुषायै नमः
ॐ वसवे नमः
ॐ विद्यायै नमः
ॐ धृत्यै नमः ॥ ९४० ॥
ॐ सभायै नमः
ॐ शिष्टायै नमः
ॐ इष्टायै नमः
ॐ शुच्यै नमः
ॐ धात्र्यै नमः
ॐ सु-धारायै नमः
ॐ अक्षोण्यजायै नमः
ॐ अमृतायै नमः
ॐ रमण्यै नमः
ॐ एकायै नमः ॥ ९५० ॥
ॐ शारदाम्बायै नमः

ॐ स-मेधायै नमः
ॐ आद्यायै नमः
ॐ शुभाक्षरायै नमः
ॐ रत्नावल्यै नमः
ॐ भारत्यै नमः
ॐ ईडायै नमः
ॐ धीरायै नमः
ॐ धियै नमः
ॐ केवलायै नमः ॥ ९६० ॥
ॐ आत्मदायै नमः
ॐ यस्यै नमः
ॐ तस्यै नमः
ॐ शुद्धयै नमः
ॐ सोस्मितायै नमः
ॐ कस्यै नमः
ॐ नीलायै नमः
ॐ राधायै नमः
ॐ अमृतोद्भवायै नमः
ॐ विभूत्यै नमः ॥ ९७० ॥
ॐ निष्कलायै नमः
ॐ रम्यायै नमः
ॐ रक्षायै नमः
ॐ सु-विमलायै नमः
ॐ क्षमायै नमः
ॐ प्राप्त्यै नमः
ॐ वासन्तिका-लेखायै नमः
ॐ भूरि-बीजायै नमः
ॐ महाऽङ्गदायै नमः
ॐ वर-धुर्यायै नमः ॥ ९८० ॥
ॐ स्वधायै नमः
ॐ ह्रियै नमः
ॐ भुवे नमः
ॐ कामिन्यै नमः
ॐ शोक-नाशिन्यै नमः
ॐ मायायै नमः
ॐ प्रीत्यै नमः
ॐ असहनायै नमः
ॐ नर्मदायै नमः
ॐ गोकुलाश्रयायै नमः ॥ ९९० ॥
ॐ अर्क-प्रभायै नमः
ॐ रसेभायै नमः
ॐ श्री-निलयायै नमः
ॐ इन्दु-प्रभायै नमः
ॐ अद्भुतायै नमः
ॐ श्रियै नमः
ॐ कृशानु-प्रभायै नमः
ॐ वज्र-लम्भनायै नमः
ॐ सर्व-भूमिदायै नमः
ॐ भोग-प्रियायै नमः ॥ १००० ॥
ॐ भोग-वत्यै नमः
ॐ भोगीन्द्र-शयनासनायै नमः
ॐ अश्व-पूर्वायै नमः
ॐ रथ-मध्यायै नमः
ॐ हस्ति-नाद-प्रबोधिन्यै नमः
ॐ सर्व-लक्षण-लक्षण्यायै नमः
ॐ सर्व-लोक-प्रियङ्कर्यै नमः
ॐ सर्व-मङ्गल-माङ्गल्यायै नमः
ॐ दृष्टादृष्ट-फल-प्रदायै नमः ॥१००९॥



पूजन-तर्पण और हवन

उक्त नाम-मन्त्रों के अन्त में **'पूजयामि नमः तर्पयामि नमः'** जोड़कर **'यन्त्र-राज'** में गन्धाक्षत, कुंकुम, पुष्प से **'पूजन-तर्पण'** करना चाहिए।

'नाम-मन्त्रों' के अन्त में **'स्वाहा'** जोड़कर **'हवन'** करना चाहिए।

'दीपावली' महा-पर्व
हेतु
कुछ विशेष साधनाएँ

१

सुख-शान्ति-दायक महा-लक्ष्मी महा-मन्त्र-प्रयोग

विनियोग : ॐ अस्य श्रीपञ्च - दश-ऋचस्य श्री - सूक्तस्य श्रीआनन्द - कर्दम-चिक्लीतेन्दिरा- सुता ऋषयः, अनुष्टुप् - वृहति - प्रस्तार - पंक्ति - छन्दांसि, श्रीमहा-लक्ष्मी देवताः, श्रीमहा - लक्ष्मी - प्रसाद - सिद्ध्यर्थे राज - वश्यार्थे सर्व - स्त्री - पुरुष-वश्यार्थे महा - मन्त्र - जपे विनियोगः।

ऋष्यादि-न्यास : श्रीआनन्द - कर्दम - चिक्लीतेन्दिरा - सुता - ऋषिभ्यो नमः शिरसि। अनुष्टुप्- वृहति - प्रस्तार - पंक्ति - छन्दोभ्यो नमः मुखे। श्रीमहा - लक्ष्मी - प्रसाद-सिद्ध्यर्थे राज - वश्यार्थे सर्व - स्त्री - पुरुष - वश्यार्थे महा - मन्त्र - जपे विनियोगाय नमः सर्वाङ्गे।

कर-न्यास : ॐ हिरण्मय्यै अंगुष्ठाभ्यां नमः। ॐ चन्द्रायै तर्जनीभ्यां स्वाहा। ॐ रजत-स्रजायै मध्यमाभ्यां वषट्। ॐ हिरण्य-स्रजायै अनामिकाभ्यां हुं। ॐ हिरण्य-स्रक्षायै कनिष्ठिकाभ्यां वौषट्। ॐ हिरण्य-वर्णायै कर-तल-करपृष्ठाभ्यां फट्।

अङ्ग-न्यास : ॐ हिरण्मय्यै नमः हृदयाय नमः। ॐ चन्द्रायै नमः शिरसे स्वाहा। ॐ रजत-स्रजायै नमः शिखायै वषट्। ॐ हिरण्य-स्रजायै नमः कवचाय हुम्। ॐ हिरण्य-स्रक्षायै नमः नेत्र-त्रयाय वौषट्। ॐ हिरण्य-वर्णायै नमः अस्त्राय फट्।

ध्यान : ॐ अरुण-कमल-संस्था, तद्रजः पुञ्ज-वर्णा,
कर-कमल - धृतेष्टा, भीति - युग्माम्बुजा च।
मणि-मुकुट- विचित्रालंकृता कल्प-जालैर्भवतु—
भुवन - माता सततं श्रीः श्रियै नः ॥

मानस-पूजनः ॐ लं पृथ्वी-तत्त्वात्मकं गन्धं श्रीमहा-लक्ष्मी-प्रीतये समर्पयामि नमः।
ॐ हं आकाश-तत्त्वात्मकं पुष्पं श्रीमहा-लक्ष्मी-प्रीतये समर्पयामि नमः।
ॐ यं वायु - तत्त्वात्मकं धूपं श्री महा-लक्ष्मी-प्रीतये घ्रापयामि नमः।
ॐ रं अग्नि - तत्त्वात्मकं दीपं श्रीमहा-लक्ष्मी-प्रीतये दर्शयामि नमः।
ॐ वं जल-तत्त्वात्मकं नैवेद्यं श्रीमहा-लक्ष्मी-प्रीतये निवेदयामि नमः।
ॐ सं सर्व-तत्त्वात्मकं ताम्बूलं श्रीमहा-लक्ष्मी-प्रीतये समर्पयामि नमः।ष्टा।।

।। महा-मन्त्र ।।

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महा-लक्ष्म्यै नमः।
ॐ दुर्गे! स्मृता हरसि भीतिमशेष-जन्तोः, स्वस्थैः स्मृता मतिमतीव-शुभां ददासि।।

ॐ हिरण्य-वर्णां हरिणीं, सुवर्ण-रजत-स्रजाम्।
चन्द्रां हिरण्मयीं लक्ष्मीं, जातवेदो म आवह।।१

दारिद्र्य-दुःख-भय-हारिणि का त्वदन्या, सर्वोपकार-करणाय सदाऽऽर्द्र-चित्ता।
ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महा-लक्ष्म्यै नमः।
ॐ दुर्गे! स्मृता हरसि भीतिमशेष-जन्तोः, स्वस्थैः स्मृता मतिमतीव-शुभां ददासि।।

तां म आवह जात-वेदो, लक्ष्मीमनप-गामिनीम्।
यस्यां हिरण्यं विन्देयं, गामश्वं पुरुषानहम्।।२

दारिद्र्य-दुःख-भय-हारिणि का त्वदन्या, सर्वोपकार-करणाय सदाऽऽर्द्र-चित्ता।
ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महा-लक्ष्म्यै नमः।
ॐ दुर्गे! स्मृता हरसि भीतिमशेष-जन्तोः, स्वस्थैः स्मृता मतिमतीव-शुभां ददासि।।

अश्व-पूर्वां रथ- मध्यां, हस्ति-नाद-प्रमोदिनीम्।
श्रियं देवामुपह्वये, श्रीर्मा देवी जुषताम्।।३

दारिद्र्य-दुःख-भय-हारिणि का त्वदन्या, सर्वोपकार-करणाय सदाऽऽर्द्र-चित्ता।
ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महा-लक्ष्म्यै नमः।
ॐ दुर्गे! स्मृता हरसि भीतिमशेष-जन्तोः, स्वस्थैः स्मृता मतिमतीव-शुभां ददासि।।

कांसोऽस्मि तां हिरण्य - प्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीं।
पद्मे स्थितां पद्म - वर्णां तामिहोपह्वये श्रियम्।।४

दारिद्र्य-दुःख-भय-हारिणि का त्वदन्या, सर्वोपकार-करणाय सदाऽऽर्द्र-चित्ता।

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महा-लक्ष्म्यै नमः।
ॐ दुर्गे! स्मृता हरसि भीतिमशेष-जन्तोः, स्वस्थैः स्मृता मतिमतीव-शुभां ददासि।।

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देव-जुष्टामुदारां।
तां पद्म-नेमिं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि।।५

दारिद्र्य-दुःख-भय-हारिणि का त्वदन्या, सर्वोपकार-करणाय सदाऽऽर्द्र-चित्ता।
ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महा-लक्ष्म्यै नमः।
ॐ दुर्गे! स्मृता हरसि भीतिमशेष-जन्तोः, स्वस्थैः स्मृता मतिमतीव-शुभां ददासि।।

आदित्य-वर्णे! तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः।।६

दारिद्र्य-दुःख-भय-हारिणि का त्वदन्या, सर्वोपकार-करणाय सदाऽऽर्द्र-चित्ता।
ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महा-लक्ष्म्यै नमः।
ॐ दुर्गे! स्मृता हरसि भीतिमशेष-जन्तोः, स्वस्थैः स्मृता मतिमतीव-शुभां ददासि।।

उपैतु मां देव - सखः, कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन्, कीर्तिं वृद्धिं ददातु मे।।७

दारिद्र्य-दुःख-भय-हारिणि का त्वदन्या, सर्वोपकार-करणाय सदाऽऽर्द्र-चित्ता।
ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महा-लक्ष्म्यै नमः।
ॐ दुर्गे! स्मृता हरसि भीतिमशेष-जन्तोः, स्वस्थैः स्मृता मतिमतीव-शुभां ददासि।।

क्षुत्-पिपासामला ज्येष्ठा, अलक्ष्मीर्नाशयाम्यहं।
अभूतिमसमृद्धिं च, सर्वान् निर्णुद मे गृहात्।।८

दारिद्र्य-दुःख-भय-हारिणि का त्वदन्या, सर्वोपकार-करणाय सदाऽऽर्द्र-चित्ता।
ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महा-लक्ष्म्यै नमः।
ॐ दुर्गे! स्मृता हरसि भीतिमशेष-जन्तोः, स्वस्थैः स्मृता मतिमतीव-शुभां ददासि।।

गन्ध-द्वारां दुराधर्षां नित्य-पुष्टां करीषिणीम्।
ईश्वरीं सर्व-भूताना, तामिहोपह्वये श्रियम्।।९

दारिद्र्य-दुःख-भय-हारिणि का त्वदन्या, सर्वोपकार-करणाय सदाऽऽर्द्र-चित्ता।
ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महा-लक्ष्म्यै नमः।
ॐ दुर्गे! स्मृता हरसि भीतिमशेष-जन्तोः, स्वस्थैः स्मृता मतिमतीव-शुभां ददासि।।

मनसः काममाकूतिं, वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य, मयि श्रीः श्रयतां यशः।।१०

दारिद्र्य-दुःख-भय-हारिणि का त्वदन्या, सर्वोपकार-करणाय सदाऽऽर्द्र-चित्ता।
ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महा-लक्ष्म्यै नमः।
ॐ दुर्गे! स्मृता हरसि भीतिमशेष-जन्तोः, स्वस्थैः स्मृता मतिमतीव-शुभां ददासि।।

कर्दमेन प्रजा-भूता, मयि सम्भ्रम-कर्दम।
श्रियं वासय मे कुले, मातरं पद्म-मालिनीम्।।११

दारिद्र्य-दुःख-भय-हारिणि का त्वदन्या, सर्वोपकार-करणाय सदाऽऽर्द्र-चित्ता।
ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महा-लक्ष्म्यै नमः।
ॐ दुर्गे! स्मृता हरसि भीतिमशेष-जन्तोः, स्वस्थैः स्मृता मतिमतीव-शुभां ददासि।।

आपः सृजन्तु स्निग्धानि, चिक्लीत वस मे गृहे।
निच - देवीं मातरं श्रियं वासय मे कुले।।१२

दारिद्र्य-दुःख-भय-हारिणि का त्वदन्या, सर्वोपकार-करणाय सदाऽऽर्द्र-चित्ता।
ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महा-लक्ष्म्यै नमः।
ॐ दुर्गे! स्मृता हरसि भीतिमशेष-जन्तोः, स्वस्थैः स्मृता मतिमतीव-शुभां ददासि।।

आर्द्रां पुष्करिणीं पुष्टिं, सुवर्णां हेम-मालिनीम्।
सूर्यां हिरण्मयीं लक्ष्मीं, जात-वेदो ममावह।।१३

दारिद्र्य-दुःख-भय-हारिणि का त्वदन्या, सर्वोपकार-करणाय सदाऽऽर्द्र-चित्ता।
ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महा-लक्ष्म्यै नमः।
ॐ दुर्गे! स्मृता हरसि भीतिमशेष-जन्तोः, स्वस्थैः स्मृता मतिमतीव-शुभां ददासि।।

आर्द्रां यः करिणीं यष्टिं, पिङ्गलां पद्म-मालिनीं।
चन्द्रां हिरण्मयीं लक्ष्मीं, जात-वेदो ममावह।।१४

दारिद्र्य-दुःख-भय-हारिणि का त्वदन्या, सर्वोपकार-करणाय सदाऽऽर्द्र-चित्ता।
ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महा-लक्ष्म्यै नमः।
ॐ दुर्गे! स्मृता हरसि भीतिमशेष-जन्तोः, स्वस्थैः स्मृता मतिमतीव-शुभां ददासि।।

तां म आवह जात - वेदो लक्ष्मीमनप - गामिनीम्।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम्।।१५

दारिद्र्य-दुःख-भय-हारिणि का त्वदन्या, सर्वोपकार-करणाय सदाऽऽर्द्र-चित्ता।
ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महा-लक्ष्म्यै नमः।
ॐ दुर्गे! स्मृता हरसि भीतिमशेष-जन्तोः, स्वस्थैः स्मृता मतिमतीव-शुभां ददासि।।

यः शुचिः प्रयतो भूत्वा, जुहुयादाज्यमन्वहम्।
श्रियः पञ्च-दशर्चं च, श्री-कामः सततं जपेत्।।१६

दारिद्र्य-दुःख-भय-हारिणि का त्वदन्या, सर्वोपकार-करणाय सदाऽऽर्द्र-चित्ता।

।। स्तुति-पाठ ।।

।। ॐ नमो नमः।।

पद्मानने पद्मिनि पद्म - हस्ते, पद्म-प्रिये पद्म-दलायताक्षि!
विश्व-प्रिये विष्णु-मनोनुकूले, त्वत्- पाद-पद्मं मयि सन्निधत्स्व।।

पद्मानने पद्म - उरु, पद्माक्षी पद्म - सम्भवे!
त्वन्मा भजस्व पद्माक्षि! येन सौख्यं लभाम्यहम्।।

अश्व - दायि च गो-दायि, धनदायै महा-धने!
धनं मे जुषतां देवि! सर्व - कामांश्च देहि मे।।

पुत्र - पौत्र - धन - धान्यं, हस्त्यश्वादि - गवे रथम्।
प्रजानां भवति मातः, अयुष्मन्तं करोतु माम्।।
धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः।
धनमिन्द्रा बृहस्पतिर्वरुणो धनमश्नुते।।
वैनतेय सोमं पिब, सोमं पिबतु वृत्रहा।
सोमं धनस्य सोमिनो, मह्यं ददातु सोमिनि।।
न क्रोधो न च मात्सर्यं, न लोभो नाशुभा मतीः।
भवन्ती कृत - पुण्यानां, भक्तानां श्री-सूक्तं जपेत्।।

★★★

२

सर्व-स्त्री-पुरुष-वश्यार्थे महा-लक्ष्मी महा-मन्त्र-प्रयोग

विनियोग : ॐ अस्य श्रीपञ्च-दश-ऋचस्य श्री-सूक्तस्य श्रीआनन्द-कर्दम-चिक्लीतेन्दिरा-सुता ऋषयः, अनुष्टुप्-वृहति-प्रस्तार-पंक्ति-छन्दांसि, श्रीमहा-लक्ष्मी देवताः, श्रीमहा-लक्ष्मी-प्रसाद- सिद्ध्यर्थे राज - वश्यार्थे सर्व-स्त्री-पुरुष-वश्यार्थे महा-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यास : श्रीआनन्द-कर्दम-चिक्लीतेन्दिरा-सुता-ऋषिभ्यो नमः शिरसि। अनुष्टुप्-वृहति-प्रस्तार-पंक्ति-छन्दोभ्यो नमः मुखे। श्रीमहा-लक्ष्मी-प्रसाद-सिद्ध्यर्थे राज-वश्यार्थे सर्व-स्त्री-पुरुष-वश्यार्थे महा-मन्त्र-जपे विनियोगाय नमः सर्वाङ्गे।

कर-न्यास : ॐ हिरण्मय्यै अंगुष्ठाभ्यां नमः। ॐ चन्द्रायै तर्जनीभ्यां स्वाहा। ॐ रजत-स्रजायै मध्यमाभ्यां वषट्। ॐ हिरण्य - स्रजायै अनामिकाभ्यां हुं। ॐ हिरण्य - स्रक्षायै कनिष्ठिकाभ्यां वौषट्। ॐ हिरण्य - वर्णायै कर-तल-करपृष्ठाभ्यां फट्।

अङ्ग-न्यास : ॐ हिरण्मय्यै नमः हृदयाय नमः। ॐ चन्द्रायै नमः शिरसे स्वाहा।। ॐ रजत-स्रजायै नमः शिखायै वषट्। ॐ हिरण्य-स्रजायै नमः कवचाय हुम्। ॐ हिरण्य-स्रक्षायै नमः नेत्र-त्रयाय वौषट्। ॐ हिरण्य-वर्णायै नमः अस्त्राय फट्।

ध्यान : **ॐ अरुण-कमल-संस्था, तद्रजः पुञ्ज-वर्णा, कर-कमल-धृतेष्टा, भीति-युग्माम्बुजा च।**
मणि-मुकुट-विचित्रालंकृता कल्प-जालैर्भवतु— भुवन - माता सततं श्रीः श्रियै नः।।

मानस-पूजन : ॐ लं पृथ्वी-तत्त्वात्मकं गन्धं श्रीमहा-लक्ष्मी-प्रीतये समर्पयामि नमः। ॐ हं आकाश-तत्त्वात्मकं पुष्पं श्रीमहा-लक्ष्मी-प्रीतये समर्पयामि नमः। ॐ यं वायु-तत्त्वात्मकं धूपं श्रीमहा-लक्ष्मी-प्रीतये घ्रापयामि नमः। ॐ रं अग्नि-तत्त्वात्मकं दीपं श्रीमहा-लक्ष्मी-प्रीतये दर्शयामि नमः। ॐ वं जल-तत्त्वात्मकं नैवेद्यं श्रीमहा-लक्ष्मी-प्रीतये निवेदयामि नमः। ॐ सं सर्व-तत्त्वात्मकं ताम्बूलं श्रीमहा-लक्ष्मी-प्रीतये समर्पयामि नमः।

।। महा-मन्त्र।।

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

ॐ हिरण्य-वर्णां हरिणीं, सुवर्ण - रजत - स्रजाम्।
चन्द्रां हिरण्मयीं लक्ष्मीं, जातवेदो म आवह ।।१

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

तां म आवह जात-वेदो, लक्ष्मीमनप-गामिनीम्।
यस्यां हिरण्यं विन्देयं, गामश्वं पुरुषानहम् ।।२

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

अश्व-पूर्वां रथ-मध्यां, हस्ति-नाद-प्रमोदिनीम्।

श्रियं देवीमुपह्वये, श्रीर्मा देवी जुषताम् ॥३

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

कांसोऽस्मि तां हिरण्य-प्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीं।

पद्मे स्थितां पद्म - वर्णां तामिहोपह्वये श्रियम् ॥४

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देव - जुष्टामुदाराम्।

तां पद्म-नेमिं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि ॥५

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

आदित्य - वर्णे! तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।

तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः ॥६

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

उपैतु मां देव - सखः, कीर्तिश्च मणिना सह।

प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन्, कीर्तिं वृद्धिं ददातु मे ॥७

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

क्षुत् - पिपासाऽमला ज्येष्ठा, अलक्ष्मीर्नाशयाम्यहम्।

अभूतिमसमृद्धिं च, सर्वान् निर्णुद मे गृहात् ॥८

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

गन्ध - द्वारां दुराधर्षां, नित्य - पुष्टां करीषिणीम्।

ईश्वरीं सर्व - भूतानां, तामिहोपह्वये श्रियम् ॥९

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

मनसः काममाकूतिं, वाचः सत्यमशीमहि।

पशूनां रूपमन्नस्य, मयि श्रीः श्रयतां यशः ॥१०

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

कर्दमेन प्रजा - भूता, मयि सम्भ्रम - कर्दम।

श्रियं वासय मे कुले, मातरं पद्म-मालिनीम् ॥११

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

आपः सृजन्तु स्निग्धानि, चिक्लीत वस मे गृहे।

निच - देवीं मातरं श्रियं वासय मे कुले ॥१२

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

आर्द्रां पुष्करिणीं पुष्टिं, सुवर्णां हेम - मालिनीम्।

सूर्यां हिरण्मयीं लक्ष्मीं, जात-वेदो ममावह ॥१३

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

आर्द्रां यः करिणीं यष्टिं, पिङ्गलां पद्म-मालिनीम्।

चन्द्रां हिरण्मयीं लक्ष्मीं, जात-वेदो ममावह ॥१४

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

तां म आवह जात - वेदो लक्ष्मीमनप - गामिनीम्।

यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम् ॥१५

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

यः शुचिः प्रयतो भूत्वा, जुहुयादाज्यमन्वहम्।

श्रियः पञ्च-दशर्चं च, श्री-कामः सततं जपेत् ॥१६

ॐ श्रीं ह्रीं श्रीं कमलालये! मह्यं प्रसीद - प्रसीद महा - लक्ष्मि! ते नमः

विधि— उक्त **महा-मन्त्र** के तीन **'पाठ'** नित्य करे। **'पाठ'** के बाद कमल के श्वेत फूल, तिल, मधु, घी, शक्कर, बेल-गूदा मिलाकर बेल की लकड़ी से नित्य १०८ बार **हवन** करे। ऐसा ६८ दिन करे। इससे मन - वाञ्छित धन प्राप्त होता है। **हवन - मन्त्र :** ॐ श्रीं ह्रीं महा-लक्ष्म्यै सर्वाभीष्ट-सिद्धिदायै स्वाहा।

३

एकाक्षर लक्ष्मी-बीज (श्रीं) की साधना

❀ प्रस्तुत - कर्ता : 'कुल-वाणी-रत्न' श्री सतीशकुमार उपाध्याय, प्रयागराज (उ०प्र०)

